# Janakaproktam Vishnu Stotram

# જનકપ્રોક્તં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Janakaproktam Vishnu Stotram

File name : viShNustotraMjanakaproktam.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Vishnudharma Upapurana. Adhyaya 65

Latest update : December 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# જનકપ્રોક્તં વિષ્ણુસ્તોત્રમ્

જનક ઉવાચ -
સમ્યગાહ ભવાન્વિપ્ર વાચ્યમેવં ભવદ્વિધૈઃ ।
મમાપિ શ્રૂયતાં વાક્યં ભવતો યદિ રોચતે ॥ ૧૧॥

યદા સર્વગતો વિષ્ણુઃ પરમાત્મા પ્રજાપતિઃ ।
તદા મિત્રાદિમધ્યસ્થસંજ્ઞા કેષુ નિપાત્યતામ્ ॥ ૧૨॥

પિતા માતા તથા ભ્રાતા યદા નાન્યજ્જનાર્દનાત્ ।
પિતૃમાતૃમયીં સંજ્ઞાં તદા કુત્ર કરોમ્યહમ્ ॥ ૧૩॥

સોઽહં બ્રવીમિ યદ્વાક્યં તન્નિબોધ દ્વિજોત્તમ ।
અનેકરૂપરૂપોઽયં વિષ્ણુરેવાખિલં જગત્ ॥ ૧૪॥

વિષ્ણુઃ પિતા મે જગતઃ પ્રતિષ્ઠા વિષ્ણુર્માતા વિષ્ણુરેવાગ્રજો મે ।
વિષ્ણુર્ગતિર્વિષ્ણુમયસ્તથાસ્મિ વિષ્ણૌ સ્થિતોઽસ્મ્યક્ષગતશ્ચ વિષ્ણુઃ ॥ ૧૫॥

યો મે મમત્વોપગતઃ સ વિષ્ણુર્યશ્ચારિભૂતો મમ સોઽપિ વિષ્ણુઃ ।
દિવં વિયદ્ભૂઃ કકુભશ્ચ વિષ્ણુર્ભૂતાનિ વિષ્ણુર્ભુવનાનિ વિષ્ણુઃ ॥ ૧૬॥

પશ્યામિ વિષ્ણું ન પરં તતોઽન્યચ્છૃણોમિ વિષ્ણું ન પરં તતોઽન્યત્ ।
સ્પૃશામિ વિષ્ણું ન પરં તતોઽન્યજ્જિઘ્રામિ વિષ્ણું ન પરં તતોઽન્યત્ ॥ ૧૭॥

રસામિ વિષ્ણું ન પરં તતોઽન્યન્મન્યે ચ વિષ્ણું ન પરં તતોઽન્યત્
જિઘ્રામિ વિષ્ણું ન પરં તતોઽન્યન્નમામિ વિષ્ણું ન પરં તતોઽન્યત્ ।
બુધ્યામિ વિષ્ણું ન પરં તતોઽન્યત્સર્વં હિ વિષ્ણુર્ન પરં તતોઽન્યત્ ॥ ૧૮॥

વિષ્ણુઃ સમસ્તં ન પરં તતોઽસ્તિ વિષ્ણુઃ સમસ્તં ન પરં ચ દેવઃ
વિષ્ણુઃ સ્થવીયાન્ન પરં તતોઽસ્તિ વિષ્ણુર્લઘીયાન્ન પરં તતોઽસ્તિ
વિષ્ણુર્ગરીયાન્ન પરં તતોઽન્યત્  વિષ્ણુરણીયાન્ન પરં તતોઽસ્તિ ॥ ૧૯॥

યથા ન વિષ્ણુવ્યતિરિક્તમન્યચ્છૃણોમિ પશ્યામિ તથા સ્પૃશામિ ।

સત્યેન તેનોપશમં પ્રયાન્તુ દોષા વિમુક્તેઃ પરિપન્થિનો યે ॥ ૨૦॥

ન મેઽસ્તિ બન્ધુર્ન ચ મેઽસ્તિ શત્રુર્ન ભૂતવર્ગો ન જનો મદન્યઃ ।
ત્વં ચાહમન્યે ચ શરીરભેદૈર્વિભિન્નમીશસ્ય હરેઃ સ્વરૂપમ્ ॥ ૨૧॥

મૂર્તામૂર્તિવિશેષં તુ પશ્યતસ્તન્મયં દ્વિજ ।
ક્રોધહર્ષાદયો ભાવાઃ સ્થાસ્યન્તિ હૃદયે કથમ્ ॥ ૨૨॥

સ ત્વં પ્રસીદ મોહોઽયમથ ચેન્મમ સુવ્રત ।
તથાપિ મા રુષં કાર્ષીરચિકિત્સ્યા હિ મોહિતાઃ ॥ ૨૩॥

ઇતિ વિષ્ણુધર્મેષુ પઞ્ચષષ્ટિતમોઽધ્યાયાન્તર્ગતં
જનકપ્રોક્તં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*Janakaproktam Vishnu Stotram*

pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*